ङ्गीकृतक्रमेण स्थातव्यम्” “तद्ग्रहणार्थं मया क्रमः सज्जीकृतः” “सिंहोऽपि क्रमं कृत्वा निःसृतः” इति च पञ्चत० तत्परतैव। परिपाट्याम् “प्रचक्रमे वक्तुमनुज्झितक्रमः” रघुः “नेत्रक्रमेणोपरुरोध सूर्य्यम्” रघुः। “नेत्रक्रमेणांशुपरिपाट्या” मल्लि०। आनुपूर्व्ये “क्रमाच्चतस्रश्चतुरोर्णवोपमाः” “रघुः क्रमाद्यौवनभिन्नशैशवः” रघुः। आनुपूर्व्वी च वस्तुभेदात् भिन्ना तत्र शब्दस्यानुपूर्वी अव्यवहितोत्तरोच्चार्य्यमाणत्वम् इतरस्य तु अव्यवहितोत्तरकालवर्त्तित्वम् यथा प्रथमं शैशवं ततोयौवनं ततो जरेति वयोविशेषाणां, विद्यानान्तु वेदपूर्व्वकत्वमितरविद्यानां तथात्वात्। एवं पदार्थगतानुपूर्व्यविशेषः यथायथमूह्यः। सच अयुगपद्भावः। “अर्थक्रियाकारित्वं च क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति” सर्व्व० स० बौ० द०। “क्रमज्ञानं क्रमाभिधानव्याप्तम्” दा०भागः। अनुष्ठाने। “इत्थमस्य विततक्रमे क्रतौ” माघः “विततक्रमे विततानुष्ठाने” मल्लि०। १०विन्यासे “उत्क्रान्तवर्णक्रमधूसराणाम्” रघुः। “उत्क्रान्तवर्णक्रमाः शीर्णवर्णविन्यासाः” मल्लि०। ११पङ्क्ते च न० “क्रमः शक्तौ परीपाट्यां क्रमं चरणपङ्क्तयोरितिविश्वोक्तेः पादे क्लीवतापि।

**क्रमक** त्रि० क्रमं वेदपाठभेदमधीते वेद वा क्रमा० वुन्। १वेदपाठविशेषरूपक्रमाध्यायिनि २तद्वेत्तरि च।

**क्रमजित्** पु० नृपभेदे “अनूपराजोदुर्द्धर्षः क्रमजिच्च सुदर्शनः” भा० स० ४अ०।

**क्रमज्या** स्त्री ग्रहाणां स्पष्टाधिकारे सि० शि० उक्ते चतुर्विंशत्यर्द्धजीवाभेदे तन्मानं तत्रोक्तं यथा

“तत्त्वाश्विनो नन्दसमुद्रवेदाश्चन्द्राद्रिषट्का गगनाङ्कनागाः पञ्चाभ्ररुद्रास्तिथिविश्वतुल्या आद्यैर्निरुक्ता नखबाणचन्द्राः। नन्दावनीशैलभुवो दिगङ्कचन्द्रा कृताग्न्यग्रहपूर्णदस्राः। तुरङ्गषट्काक्षतयः कुरामसिद्धाः शराष्टेषुयमाः क्रमेण। गजाश्विभान्यङ्कशराष्टदस्रास्तुरङ्गसप्तग्रहलोचनानि। अम्भोधिकुम्भाग्निगुणास्तुरङ्गशैलेन्दुरामा रसभूतदन्ताः। कुदन्तलोका द्वितुरङ्गदेवा गोऽभ्राब्धिलोकाः कुगुणाब्धिरामाः। भुजङ्गलोकाब्धिगुणाः क्रमज्या” सू०

“इह हि स्पष्टीकरणप्रभृति सर्वकर्माणि ज्याभिः प्रतिपाद्यते। यतो ग्रहवलये कोऽप्यविभिन्नः प्रदेशोमध्यशब्देनोच्यते। तस्मान्मध्यस्थत्वात् तिर्य्यक्स्थोग्रहो वलयेऽर्द्धज्याग्रे भवति। अतोऽर्द्धज्याभिः सर्वं कर्म। तत्र भगणकलाङ्कितवृत्तचतुर्थांशे ईदृशान्येव चतुर्विंशतिज्यार्द्धानि भवन्ति” प्रमिता०। २४क्रमज्याङ्काश्च यथा

२२५। ४४९। ६७१। ८९०। ११०५। १३१५। १५२०। १७१९। १९१०। २०९३। २२६७। २४३१। २५८५। २७२८। २८५९। २९७७। ३०८४। ३१७७। ३२५६। ३२२१। ३२७२। ३४०९। ३४३१। ३४३८।

तासां तथामानं समर्थितं सू० सि० रङ्गनाथाभ्यां यथा “राशिलिप्ताष्टमो भागः प्रथमं ज्यार्धमुच्यते। तत्तद्विभक्तलब्धोनमिश्रितं तद् द्वितीयकम्। आद्येनैवं क्रमात् पिण्डान् भक्त्वा लब्धोनसंयुताः। खण्डकाः स्युश्चतुर्विंशज्ज्यार्धपिण्डाः क्रमादमी” सू० सि०।

“एकराशिकलानामष्टादशशतानामष्टमोऽंशस्तत्त्वाश्विमितः २२५ प्रथममाद्यं ज्यार्धं सम्पूर्णजीवार्धपिण्डकः कथ्यते तदभिज्ञैः। ततः प्रथमज्यार्धात् तेन प्रथमज्यार्धेन भक्तालब्धेन हीनमन्यस्याप्रसङ्गात् प्रथमज्यार्धमनेन युक्तं तत् प्रथमज्यार्धं द्वितीयकं ज्यार्धं भवति द्विगुणप्रथमैकोनम्। तृतीयादीनामानयनार्थमुक्तप्रकारमतिदिशति आद्येनेति। प्रथमज्यार्द्धपिण्डेन। एवमुक्तरीत्या क्रमात् सिद्धपिण्डान् भक्त्वा लब्धैरूनमाद्यं खण्डमनेन युताः खण्डका असिद्धाव्यवहितसिद्धज्यार्धपिण्डा असिद्धपिण्डा भवन्ति। यथा प्रथमखण्डं २२५ प्रथमभक्तं फलं १ तेन हीनं खण्डं २२४ तेन युक्तं द्वितीयखण्डं ४४९। तच्च प्रथमभक्तं फलम् २ अर्धाधिकावयवस्यैकाधिकत्वेन ग्रहणस्य साम्प्रदायिकत्वात्। फलैक्येन ३हीनं प्रथमम् २२२ अनेन द्वितीयखण्डो ४४९ युतस्तृतीयम् ६७१। एवमिदं प्रथमखण्डभक्तं फलम् ३अनेन पूर्वफलैक्येन ३युतं जातं सर्व्वफलैक्यम् ६ अनेन प्रथमं खण्डं हीनम् २१९ अनेन तृतीय ६७१युतं चतुर्थम् ८९०। एवमिदं प्रथमखण्डभक्तं फलं ४ पूर्व्वलब्धैक्येन ५हीनं प्रथमखण्डरूपं २१९ ज्यान्तररूपखण्डकमनेन ४ हीनं २१५ चतुर्थ८९० युतं पञ्चमं ११०५ एवमन्येऽपि। अयोक्तरीत्याऽसङ्ख्यखण्डानां सम्भवात् खण्डनियममाह स्युरिति। एवं चतुर्विंशत्सङ्ख्याका ज्यार्धपिण्डाः कार्या न तदधिकाः। “एकविंशाच्च विंशाच्च षष्ठात् पञ्चदशादपि। सप्तमाद्द्वादशात् सप्तदशान्नाधोत्तरं मतम्” इति ब्रह्मसिद्धान्तोक्तस्थलेऽर्धाधिकावयवस्यैकाधिकत्वेन न ग्रहणम् इतिध्येयम्। गणितस्याविकृतत्वात् सिद्धाः पिण्डाः कथं नोक्ताः? इत्यत आह क्रमादिति। अमी सिद्धाः पिण्डाः क्रमात्